अङ्क-२६
जुलाई-दिसम्बर २०१५

**वेदविद्या**
ISSN-2230-8962

# वेदाङ्गेषु निरुक्तानुसारं देवतातत्त्वविचारः

**निलम सुरेन्द्रप्रसाद रावलः**

वेदः भवति यज्ञप्रधानः। यज्ञकर्मणि देवान् उद्दिश्य हविः प्रदीयते। तत्र यस्य देवस्य कृते हविः दीयते स एव देवः तस्मिन् समये सर्वेषु देवेषु श्रेष्ठः तथा परमेश्वरः इति रूपेण श्रूयते। अन्ये देवाः तस्य देवस्य अधीनाः भवन्ति। वैदिकवाङ्मये देववादस्य अद्भुतं महत्त्वं वर्तते। कुत्रचित् बहुदेववादस्य, कुत्रचित् सर्वेश्वरवादस्य, कुत्रचित् एकदेववादस्य समुल्लेखः वर्तते। वैदिकमान्यतानुसारं बह्व्यः देवताः असङ्ख्याताश्च शास्त्रे विलसन्ति। एतस्मिन् प्रसङ्गे निरुक्तकारो यास्कः तिस्र एव देवताः इति स्वीकरोति। यास्काचार्यः सर्वेषां देवानां मौलिकरूपेण त्रिषु देवेषु एव अन्तर्भावः चिकीर्षति। आचार्ययास्कः स्वकीये निरुक्तशास्त्रे देवतातत्त्वं कथं निरूपयामास? तं विषयम् अधिकृत्य अहं किञ्चित् विवक्षुरस्मि।

**यास्काचार्यानुसारं देवतानां सङ्ख्या -**

यास्कप्रणीतस्य निरुक्तस्य सप्तमोऽध्यायः दैवतकाण्डनाम्ना ज्ञायते। अस्य दैवतकाण्डस्य द्वितीये पादे आचार्ययास्कः कथयति यत् **"तिस्रः एव देवताः इति नैरुक्ताः।"**[१] अर्थात् निरुक्तानुसारं तिस्रः एव देवताः सन्ति। ताश्च काः ? इति विचारणात् पूर्वम् एतत् स्पष्टीक्रियते यत् अस्यां पङ्क्तौ तिस्रः शब्दः सङ्ख्या त्रयस्य नियामकः एव।

तिस्रः देवताः इमाः सन्ति-अग्निः, वायुः एवं सविता सूर्यो वा। एतासां सर्वासां देवतानां पृथक् पृथग् ग्रहणं कथं कृतम्? इति जिज्ञासायां निरुक्तकारेण प्रोक्तं यत् **"अग्निः पृथिवीस्थानः वायुर्वेन्द्रो वान्तरिक्षस्थानः, सूर्यो द्युस्थानः।"**[२] यतो हि लोका अपि त्रयः सन्ति। पृथिवीलोकः, अन्तरिक्षलोकः, द्युलोकश्च। यद्यपि पौराणिकमान्यतानुसारं एतत् जगत् चतुर्दशभुवनमण्डलात्मकं किन्तु वैदिक-मान्यतानुसारं अत्रैव सर्वेषां लोकानां ग्रहणं भवति। अतएव एतेषां सर्वेषां लोकानां नियन्त्रणकर्तारोऽपि देवाः इमे एव त्रयः सन्ति।

एतासां देवतानां महाभाग्यात् एकात्मा बहुधा स्तूयते। निरुक्तकारेण उक्तं यथा - **"तासां महाभाग्यात् एकैकस्या अपि बहूनि नामधेयानि भवन्ति।"**[३] तासां तिसृणामग्न्यादीनां महाभाग्यात् अर्थात्

---

[१] निरुक्तम्, ७/२/१
[२] निरुक्तम्, ७/२/१
[३] निरुक्तम्, ७/२/२

ऐश्वर्ययोगात्, एकात्मनामनेकधा विकुर्वन्तीनामेकैकस्याः प्रतिविकारं जातवेदाः, वैश्वानरः, वरुणः, रुद्रः, अश्विनौ, उषा इत्येवम् आदीनि बहूनि नामधेयानि भवन्ति।

**अग्निदेवतायाः परिचयः**

तिसृषु देवतासु अग्निदेवस्य स्थानं प्रथमं वर्तते। अग्निदेवस्य अयं लोकः अर्थात् भूलोकः पृथिवीलोको वा। प्रातःसवनम् अग्निदेवस्य कृते भवति। अग्निदेवस्य वसन्तऋतुः, गायत्रीछन्दः, त्रिवृत्सोमः एवं रथन्तरसाम वर्तते। प्रथमे स्थाने पठित देवगणस्य प्रतिनिधिः अग्निदेवता वर्तते। अग्नायीइडापृथिवीमपि अग्न्यान्तर्गतमेव ज्ञातव्यम्। शरदृऋतुः, अनुष्टुप्छन्दः, एकविंशतिस्तोमः तथा वैराजसाम अपि पृथिवीस्थानीय वर्तन्ते अर्थात् अग्निदेवस्य कृते वर्तन्ते।

अग्निदेवस्य प्रमुखं कर्म हविषां वहनं तथा देवतानां आह्वाहनं वर्तते। अर्थात् विभिन्नाभ्यः देवताभ्यः यत् किञ्चिदपि हविः दीयतेतस्य हविषः वहनं तथा यज्ञकर्मणि देवतानाम् आह्वानम् अग्निदेवस्य प्रमुखं कर्म वर्तते। तथा च यत् किञ्चिदपि दर्शनविषयकम्, प्रकाशादिकम् तत्त्वं वर्तते तत् सर्वम् अग्नेः कर्म एव।

अग्निः अग्रणीर्भवति, अग्रं यज्ञेषु प्रणीयते, अङ्ग नयति सन्नममानः। अर्थात् यज्ञे सर्वप्रथमं अग्नेः आह्वानं भवति। तथा यः कोऽपि अग्नेः आश्रयं नयति तं सः आत्माधीनं करोति। अक्नोपनो भवतीति स्थौलाष्ठीविः। न क्नोपयति न स्नेहयति। अतः सः अग्नि उच्यते। यथा ऋग्वेदे अग्निविषयको मन्त्रो आयाति -

**अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म।**
**होता॑रं रत्न॒धात॑मम्॥**[१]

अग्निमीळेऽग्निं यचामि। ईळिरध्येषणाकर्म। पूजाकर्म वा। पुरोहितो व्याख्यातो यज्ञश्च। देवो दानाद्वा। दीपनाद्वा। द्यौतनाद्वा। द्युस्थानो भवतीति वा यो देवः सा देवता। होतारं ह्वातारम्। जुहोतेर्होतेत्यौर्णवाभः। रत्नधातमं रणीयानां धनानां दातृतमम् इत्यर्थः।

**इन्द्रदेवतायाः परिचयः**

वायुः वा इन्द्र अन्तरिक्षस्थानीय देवता वर्तते। तस्याः देवतायाः अन्तरिक्षलोकः वर्तते। माध्यन्दिन सवनम्। ग्रीष्मऋतुः, त्रिष्टुप्छन्दः, पञ्चदशस्तोमः, बृहत्साम आदि इन्द्रदेवस्य कृते वर्तते। तथा च ये च देवगणाः समाम्नाता मध्यमे स्थाने याश्च स्त्रियः। तथा हेमन्तऋतुः, पङ्क्तिछन्दः, त्रिणवस्तोमः तथा शाक्करसाम आदि अन्तरिक्षस्थानीयाः वर्तन्ते।

इन्द्रदेवस्य कर्म रसानुप्रदानं वृत्रवधश्च वर्तते। अर्थात् वृष्टिकार्यं तथा मेघस्य वधः वर्तते। तथा च या का च बलकृतिः वर्तते तत् सर्वं इन्द्रस्य कर्म वर्तते। ऋग्वेदे अन्तरिक्षस्थानीय देवस्य कृते अर्थात्

---

[१] ऋग्वेदः, १/१/१

इन्द्रस्य वायोः वा विद्युतः कृते मन्त्रः वर्तते यथा -

**अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम्।**
**घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः॥**[१]

अभिनमन्त समनस इव योषाः। समनं समननाद्वा। संमाननाद्वा। कल्याण्यः। स्मयमानासः। अग्निमित्यौपमिकं घृतस्य धारा उदकस्य धाराः समिधो नसन्त। नसतिराप्नोतिकर्मा वा। नमतिकर्मा वा। ता जुषाणो हर्यति जातवेदाः। हर्यतिः प्रप्साकर्मा। विहर्य्यति।

**सूर्यदेवतायाः परिचयः**

निरुक्तानुसारं सूर्यदेवता द्युस्थानीयो वर्तते। आचार्ययास्कः कथयति यत् आदित्यदेवस्य असौ लोकः अर्थात् द्युलोकः, तृतीयसवनम्, वर्षाऋतुः, जगतीछन्दः, सप्तदशस्तोम एवं वैरूपंसाम। तथा च शिशिरऋतुः, अतिछन्दः, त्रयस्त्रिंशत्स्तोम एवं रैवतसामादि द्युलोकभागिनः सन्ति।

आदित्यदेवस्य कर्म रसादानम् अर्थात् रसस्य आकर्षणम्, रश्मिभिश्च रसधारणम् अर्थात् किरणैः रसधारणम्-ग्रहणम्, तथा च यच्च किञ्चित् प्रवह्लितम् अर्थात् वनस्पत्यौषधीनां वृद्धिः एवं पुष्टिः तत् सर्वम् आदित्यकर्म वर्तते। आदित्यस्य मन्त्र ऋग्वेदे प्राप्यते यथा -

**वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः।**
**इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण॥**[२]

इतो जातः सर्वमिदमभिविपश्यति। वैश्वानरः संयतते सूर्येण। राजा यः सर्वेषां भूतानाम-भिश्रयणीयः तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्यामिति।

एवं प्रकारेण निरुक्ते तिस्रदेवतानां निरूपणम् आचार्यवर्येण यास्केन कृतं वर्तते।

**अग्नि एव सर्वाः देवताः**

ऐतरेयब्राह्मणस्य कथनमस्ति यत् **"अग्निः सर्वाः देवताः"**[३] अर्थात् अग्नि एव सर्वेषु देवेषु मुख्यो वर्तते। अथवा अग्नेः कथनेन एव अन्येषां ग्रहणं भवति। ऋग्वेदस्य एका ऋचा अस्य ब्राह्मणवचनस्य अधिकं समर्थनार्थं प्रमाणरूपेण दत्ता वर्तते। यथा -

**इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।**
**एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥**[४]

---

[१] ऋग्वेदः, ४/५८/८
[२] ऋग्वेदः, १/९८/१
[३] ऐतरेयब्राह्मणम्, २/३
[४] ऋग्वेदः, १/१६४/४६

कथनस्य तात्पर्यमस्ति यत् अग्निरेव इन्द्रं मित्रं वरुणमादिनामभिः ज्ञायते। तथा स अग्निरेव दिव्यदिविज अर्थात् द्युलोकवासी, सुपर्ण अर्थात् पतनशीलः, गरुत्मान् अर्थात् स्तुतियुक्त अथवा रसान् यः आकर्षयति स आदित्य अपि प्रसिद्धाग्निरेवाऽस्ति। अयमेकमग्निमेव मेधावी तथा आत्मज्ञानी जनाः अनेकैः नामभिः आह्वयन्ति। यथा यम तथा मातरिश्वादि देवाः।

पश्चात् कथितं वर्तते यत् निस्सन्देहेन अनेकानां नामानि अग्निः वर्तते। यथा - विद्युत्, आदित्यादि अपि अग्नि अस्ति, किन्तु गौणरूपेण। गौणीवृत्या एते अग्निनाम्ना व्यवहृताः सन्ति। किन्तु वास्तवरूपेण एषः पार्थिवाग्निरेव अग्निरस्ति।

तथा वर्षाकर्मणा वैश्वानरस्य स्तुतिः कृता वर्तते, अत एषः मध्यमअग्नि अर्थात् विद्युत् अस्ति तदपि उचितं नास्ति। कारणं अस्मिन् पार्थिवाग्नौ एव सर्वम् उपपद्यते। अग्रिमे मन्त्रे वर्णितमस्ति यथा -

**समानमेतदुदकमुच्चैत्यव चाहभिः।**
**भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः॥**[१]

समानम्-एकमेवेदम्, उदकम्-उदकत्वेनाविशिष्टम् उच्चैत्यवचाहभिः। उत् एति च ऊद्धध्वं चैति। अहोभिर्निमित्तभूतैः पुनश्च अहोभिरेव अवाम् एति नीचैरागच्छति। भूमिं पर्जन्या माध्यमिका देवगणा जिन्वन्ति-तर्पयन्ति, ओषध्युत्पत्तये एवं तावदवाम् एति। यथैवामुतो वर्षेणेमां पर्जन्या जिन्वन्ति। तथैवाहुतिप्रभावेण वर्षेण दिवं जिन्वन्त्यग्नयः आहुतयो ह्यग्नौ प्रक्षिप्ताः पुनर्वर्षं प्रकल्पयन्ति।

सर्वे देवाः अग्नौ एव सन्निहिताः सन्ति। द्युलोके यः अग्नि अस्ति सः सौराग्निरस्ति। अन्तरिक्षलोके य अग्निरस्ति सः विद्युताग्नि अस्ति। वृक्षेस्थित अग्निः दावाग्निः वर्तते, जलेस्थित अग्निः वडवानलाग्निरूपेण व्यवह्रियते तथा शरीरेस्थित अग्निः जठराग्निरूपेण ज्ञायते। अतः वक्तुं शक्यते यत् सम्पूर्णं जगत् अग्निमयमस्ति। अतेव कथ्यते यत् **"अग्निरेव सर्वाः देवताः।"**

**निलमः सुरेन्द्रप्रसाद रावलः**
शोधच्छात्रा, वेदविभागः,
श्रीसोमनाथः संस्कृतयूनिवर्सिटी, वेरावलम्
जूनागढम्, (गुजरातम्)

१ ऋग्वेदः, १/१६४/५१